Gautama Sutra

(अथ प्रथमः अध्यायः)

[अनुबन्धचतुष्टयप्रकरणम्]

१.१.१: प्रमाण प्रमेय+संशय प्रयोजन दृष्टान्त सिद्धान्ता वयव तर्क निर्णय वाद जल्प+वितण्डा+हेत्वाभास+च्छल जाति निग्रहस्थानानाम्तत्त्वज्ञानात् निःश्रेयसाधिगमः

{पदार्थोद्देशसूत्रम्}

१.१.२: दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानाम् उत्तरोत्तरापाये तदनन्तरा पायात् अपवर्गः

{पदार्थोद्देशसूत्रम्}

[प्रमाणप्रकरणम्]

१.१.३: प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि

{प्रमाण-उद्देश-सूत्रम्}

१.१.४: इन्द्रियार्थसन्निकर्षोत्पन्नम् ज्ञानम् अव्यपदेश्यम् अव्यभिचारि व्यवसायात्मकम् प्रत्यक्षम्

{प्रत्यक्षलक्षणम्}

१.१.५: अथ तत्पूर्वकं त्रिविधम् अनुमानं पूर्ववत् शेषवत् सामान्यतोदृष्टं च

{अनुमानलक्षणम्}

१.१.६: प्रसिद्धसाधर्म्यात् साध्यसाधनम् उपमानम्

{उपमानलक्षणम्}

१.१.७: आप्तोपदेशः शब्दः

{शब्दलक्षणम्}

१.१.८: सः द्विविधः दृष्टादृष्टार्थत्वात्

{शब्दभेदः}

[प्रमेयप्रकरणम्]

१.१.९: आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गाः तु प्रमेयम्

{प्रमेय-उद्देश-सूत्रम्}

१.१.१०: इच्छाद्वेषप्रयत्नसुखदुःखज्ञानानि आत्मनः लिङ्गम् इति

{आत्मलक्षणम्}

१.१.११: चेष्टेन्द्रियार्थाश्रयः शरीरम्

{शरीरलक्षणम्}

१.१.१२: घ्राणरसनचक्षुस्त्वक्श्रोत्राणि इन्द्रियाणि भूतेभ्यः

{इन्द्रियलक्षणम्}

१.१.१३: पृथिवी आपः तेजः वायुः आकाशम् इति भूतानि

{भूतलक्षणम्}

१.१.१४: गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणाः तदर्थाः

{अर्थ(विषय)लक्षणम्}

१.१.१५: बुद्धिः उपलब्धिः ज्ञानम् इति अनर्थान्तरम्

{बुद्धिलक्षणम्}

१.१.१६: युगपत् ज्ञानानुत्पत्तिः मनसः लिङ्गम्

{मनोलक्षणम्}

१.१.१७: प्रवृत्तिः वाग्बुद्धिशरीरारम्भः

{प्रवृत्तिलक्षणम्}

१.१.१८: प्रवर्त्तनालक्षणाः दोषाः

{दोषलक्षणम्}

१.१.१९: पुनरुत्पत्तिः प्रेत्यभावः

{प्रेत्यभावलक्षणम्}

१.१.२०: प्रवृत्तिदोषजनितः अर्थः फलम्

{फललक्षणम्}

१.१.२१: बाधनालक्षणम् दुःखम्

{दुःखलक्षणम्}

१.१.२२: तदत्यन्तविमोक्षः अपवर्गः

{अपवर्गलक्षणम्}

[न्यायपूर्वाङ्गलक्षणप्रकरणम्]

१.१.२३: समानानेकधर्मोपपत्तेः विप्रतिपत्तेः उपलब्ध्यनुपलब्ध्यव्यवस्थातः च

विशेषापेक्षः विमर्शः संशयः

{संशयलक्षणम्}

१.१.२४: यम् अर्थम् अधिकृत्य प्रवर्तते तत् प्रयोजनम्

{प्रयोजनलक्षणम्}

१.१.२५: लौकिकपरीक्षकाणां यस्मिन् अर्थे बुद्धिसाम्यम् सः दृष्टान्तः

{दृष्टान्तलक्षणम्}

[न्यायाश्रयसिद्धान्तलक्षणप्रकरणम्]

१.१.२६: तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः

{अभ्युपगमसिद्धान्तलक्षणम्}

१.१.२७: सः चतुर्विधः सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात्

{तन्त्रभेद-उद्देशसूत्रम्}

१.१.२८: सर्वतन्त्राविरुद्धः तन्त्रे अधिकृतः अर्थः सर्वतन्त्रसिद्धान्तः

{सर्वतन्त्रसिद्धान्त-लक्षणम्}

१.१.२९: समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः

{प्रतितन्त्रसिद्धान्त-लक्षणम्}

१.१.३०: यत्सिद्धौ अन्यप्रकरणसिद्धिः सः अधिकरणसिद्धान्तः

{अधिकरणसिद्धान्त-लक्षणम्}

१.१.३१: अपरीक्षिताभ्युपगमात् तद्विशेषपरीक्षणम् अभ्युपगमसिद्धान्तः

{अभ्युपगमसिद्धान्त-लक्षणम्}

[न्यायप्रकरणम्]

१.१.३२: प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि अवयवाः

{अवयव-उद्देशसूत्रम्}

१.१.३३: साध्यनिर्देशः प्रतिज्ञा

{प्रतिज्ञा-लक्षणम्}

१.१.३४: उदाहरणसाधर्म्यात् साध्यसाधनं हेतुः

{हेतु-लक्षणम्}

१.१.३५: तथा वैधर्म्यात्

{हेतु-लक्षणम्}

१.१.३६: साध्यसाधर्म्यात् तद्धर्मभावी दृष्टान्तः उदाहरणम्

{उदाहरण-लक्षणम्}

१.१.३७: तद्विपर्ययात् वा विपरीतम्

{उदाहरण-लक्षणम्}

१.१.३८: उदाहरणापेक्षः तथा इति उपसंहारः न तथा इति वा साध्यस्य उपनयः

{उपनय-लक्षणम्}

१.१.३९: हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनम् निगमनम्

{निगमन-लक्षणम्}

[न्यायोत्तराङ्गप्रकरणम्]

१.१.४०: अविज्ञाततत्वे अर्थे कारणोपपत्तितः तत्त्वज्ञानार्थम् उहः तर्कः

{तर्क-लक्षणम्}

१.१.४१: विमृश्य पक्षप्रतिपक्षाभ्याम् अर्थावधारणम् निर्णयः

{निर्णय-लक्षणम्}

(इति न्यायसूत्रे प्रथमाध्यायस्य प्रथमम् आह्निकम्)

(अथ द्वितीयम् आह्निकम्)

[कथालक्षणप्रकरणम्]

१.२.१: प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहः वादः

{वाद-लक्षणम्}

१.२.२: यथोक्तोपपन्नः छलजातिनिग्रहस्थानसाधनोपालम्भः जल्पः

{जल्प-लक्षणम्}

१.२.३: सः प्रतिपक्षस्थापनाहीनः वितण्डा

{वितण्डा-लक्षणम्}

[हेत्वाभासप्रकरणम्]

१.२.४: सव्यभिचार-विरुद्ध-प्रकरणसम-साध्यसम-कालातीताः हेत्वाभासाः

{हेत्वाभास-उद्देश-सूत्रम्}

१.२.५: अनैकान्तिकः सव्यभिचारः

{सव्यभिचार-लक्षणम्}

१.२.६: सिद्धान्तम् अभ्युपेत्य तद्विरोधी विरुद्धः

{विरुद्ध-लक्षणम्}

१.२.७: यस्मात् प्रकरणचिन्ता सः निर्णयार्थमपदिष्टः प्रकरणसमः

{प्रकरणसम-लक्षणम्}

१.२.८: साध्याविशिष्टः साध्यत्वात् साध्यसमः

{साध्यसम-लक्षणम्}

१.२.९: कालात्ययापदिष्टः कालातीतः

{कालातीत-लक्षणम्}

[छलप्रकरणम्]

१.२.१०: वचनविघातः अर्थविकल्पोपपत्त्या छलम्

{छल-लक्षणम्}

१.२.११: तत् त्रिविधम् - वाक्छलम् सामान्यच्छलम् उपचारच्छलम् च इति

{छल-भेद-उद्देश-सूत्रम्}

१.२.१२: अविशेषाभिहिते अर्थे वक्तुः अभिप्रायात् अर्थान्तरकल्पना वाक्छलम्

{वाक्छल-लक्षणम्}

१.२.१३: सम्भवतः अर्थस्य अतिसामान्ययोगात् असम्भूतार्थकल्पना सामान्यच्छलम्

{सामान्यच्छल-लक्षणम्}

१.२.१४: धर्मविकल्पनिर्देशे अर्थसद्भावप्रतिषेधः उपचारच्छलम्

{उपचारच्छल-लक्षणम्}

१.२.१५: वाक्छलम् एव उपचारच्छलम् तत् अविशेषात्

{उपचारच्छल-पूर्वपक्ष-लक्षणम्}

१.२.१६: न तत् अर्थान्तरभावात्

{उपचारच्छल-लक्षणम्}

१.२.१७: अविशेषे वा किञ्चित्साधर्म्यात् एकच्छलप्रसङ्गः

{उपचारच्छल-लक्षणम्}

[लिङ्गदोषसामान्यप्रकरणम्]

१.२.१८: साधर्म्यवैधर्म्याभ्याम् प्रत्यवस्थानं जातिः

{जाति-लक्षणम्}

१.२.१९: विप्रतिपत्तिः अप्रतिपत्तिः च निग्रहस्थानम्

{निग्रहस्थान-लक्षणम्}

१.२.२०: तद्विकल्पात् जातिनिग्रहस्थानबहुत्वम्

{निग्रहस्थानबहुत्व-सूत्रम्}

(इति न्यायसूत्रे प्रथमाध्यायस्य द्वितीयम् आह्निकम्)

(समाप्तः च अयम् प्रथमः अध्यायः)

(अथ द्वितीयः अध्यायः)

(प्रथमम् आह्निकम्)

[संशयपरीक्षाप्रकरणम्]

२.१.१: समानानेकधर्माध्यवसायात् अन्यतरधर्माध्यवसायात् वा न संशयः

{संशय-}

२.१.२: विप्रत्तिपत्त्यव्यवस्थाध्यवसायात् च

{संशय-}

२.१.३: विप्रत्तिपत्तौ च संप्रत्तिपत्तेः

{संशय-}

२.१.४: अव्यवस्था आत्मनि व्यवस्थितत्वात् च अव्यवस्थायाः

{संशय-}

२.१.५: तथा अत्यन्तसंशयः तद्धर्मसातत्योपपत्तेः

{संशय-}

२.१.६: यथोक्ताध्यवसायात् एव तद्विशेषापेक्षात् संशये न असंशयः न अत्यन्तसंशयः वा

{संशय-}

२.१.७: यत्र संशयः तत्र एवम् उत्तरोत्तरप्रसङ्गः

{संशय-}

[प्रमाणसामान्यपरीक्षाप्रकरणम्]

२.१.८: प्रत्यक्षादीनाम् अप्रामाण्यं त्रैकाल्यासिद्धेः

{पूर्वपक्षसूत्रम्}

२.१.९: पूर्वं हि प्रमाणसिद्धौ न इन्द्रियार्थसन्निकर्षात् प्रत्यक्षोत्पत्तिः

{पूर्वपक्षसूत्रम्}

२.१.१०: पश्चात्सिद्धौ न प्रमाणेभ्यः प्रमेयसिद्धिः

{पूर्वपक्षसूत्रम्}

२.१.११: युगपत्सिद्धौ प्रत्यर्थनियतत्वात् क्रमवृत्तित्वाभावः बुद्धीनाम्

{पूर्वपक्षसूत्रम्}

२.१.१२: त्रैकाल्यासिद्धेः प्रतिषेधानुपपत्तिः

{पूर्वपक्षसूत्रम्}

२.१.१३: सर्वप्रमाणप्रतिषेधात् च प्रतिषेधानुपपत्तिः

{पूर्वपक्षसूत्रम्}

२.१.१४: तत्प्रामाण्ये वा न सर्वप्रमाणविप्रतिषेधः

{पूर्वपक्षसूत्रम्}

२.१.१५: त्रैकाल्याप्रतिषेधः च शब्दात् आतोद्यसिद्धिवत् तत्सिद्धेः

{पूर्वपक्षसूत्रम्}

२.१.१६: प्रमेया च तुलाप्रामाण्यवत्

{पूर्वपक्षसूत्रम्}

२.१.१७: प्रमाणतः सिद्धेः प्रमाणानाम् प्रमाणान्तरसिद्धिप्रसङ्गः

{पूर्वपक्षसूत्रम्}

२.१.१८: तद्विनिवृत्तेः वा प्रमाणसिद्धिवत् प्रमेयसिद्धिः

{पूर्वपक्षसूत्रम्}

२.१.१९: न, प्रदीपप्रकाशसिद्धिवत् तत्सिद्धेः

{सिद्धान्तलक्षणम्}

२.१.२०: क्वचित् निवृत्तिदर्शनात् अनिवृत्तिदर्शनात् च क्वचित् अनेकान्तः

{सिद्धान्तलक्षणम्}

[प्रत्यक्षपरीक्षाप्रकरणाम्]

२.१.२१: प्रत्यक्षलक्षणानुपपत्तिः असमग्रवचनात्

{प्रत्यक्षलक्षण-}

{प्रत्यक्षलक्षणपरीक्षा}

२.१.२२: न आत्ममनसोः सन्निकर्षाभावे प्रत्यक्षोत्पत्तिः

(दो)

२.१.२३: दिग्देशकालाकाशेषु अपि एवं प्रसङ्गः

(दो)

२.१.२४: ज्ञानलिङ्गत्वात् आत्मनः न अनवरोधः

{प्रत्यक्षलक्षण-सिद्धान्त-सूत्रम्}

२.१.२५: तदयौगपद्यलिङ्गत्वात् च न मनसः

{प्रत्यक्षलक्षण-सिद्धान्त-सूत्र}

२.१.२६: प्रत्यक्षनिमित्तत्वात् च इन्द्रियार्थयोः सन्निकर्षस्य स्वशब्देन वचनम्

{प्रत्यक्षलक्षण-सिद्धान्त-सूत्र}

२.१.२७: सुप्तव्यासक्तमनसां च इन्द्रियार्थयोः सन्निकर्षनिमित्तत्वात्

{प्रत्यक्षलक्षण-सिद्धान्त-सूत्र}

२.१.२८: तैः च अपदेशः ज्ञानविशेषाणाम्

{प्रत्यक्षलक्षण-सिद्धान्त-सूत्र}

२.१.२९: व्याहतत्वात् अहेतुः

{प्रत्यक्षलक्षण-सिद्धान्त-सूत्र}

२.१.३०: न अर्थविशेषप्राबल्यात्

{प्रत्यक्षलक्षण-सिद्धान्त-सूत्र}

[विषयपरीक्षा-प्रकरणाम्]

२.१.३१: प्रत्यक्षम् अनुमानम् एकदेशग्रहणात् उपलब्धेः

{पूर्वपक्ष-सूत्र}

२.१.३२: न, प्रत्यक्षेण यावत् तावत् अपि उपलम्भात्

{सिद्धान्त-सूत्र}

।2.1.33:न चैकदेशोपलब्धिरवयविसद्भावात्

{सिद्धान्त-सूत्र}

{प्रसङ्गोपात्ता अवयविपरीक्षा}।

२.१.३४: साध्यत्वात् अवयविनि सन्देहः

{पूर्वपक्ष-सूत्र}

२.१.३५: सर्वाग्रहणम् अवयव्यसिद्धेः

{सिद्धान्त-सूत्र}

२.१.३६: धारणाकर्षणोपपत्तेः च

{सिद्धान्त-सूत्र}

२.१.३७: सेनावनवत् ग्रहणम् इति चेत् न अतीन्द्रियत्वात् अणूनाम्

{सिद्धान्त-सूत्र}

[अनुमानपरीक्षाप्रकरणम्]

२.१.३८: रोधोपघातसादृश्येभ्यः व्यभिचारात् अनुमानम् अप्रमाणम्

{पूर्वपक्ष-सूत्र}

२.१.३९: न, एकदेशत्राससादृश्येभ्यः अर्थान्तरभावात्

{सिद्धान्त-सूत्र}

{वर्तमानकालपरीक्षा}

२.१.४०: वर्तमानाभावः, पततः पतितपतितव्यकालोपपत्तेः

{पूर्वपक्ष-सूत्र}

२.१.४१: तयोः अपि अभावः वर्तमानाभावे, तदपेक्षत्वात्

{सिद्धान्त-सूत्र}

२.१.४२: न अतीतानागतयोः इतरेतरापेक्षा सिद्धिः

{सिद्धान्त-सूत्र}

२.१.४३: वर्तमानाभावे सर्वाग्रहणं प्रत्यक्षानुपपत्तेः

{सिद्धान्त-सूत्र}

२.१.४४: कृततार्कत्तव्यतोपपत्तेः तु उभयथा ग्रहणम्

{सिद्धान्त-सूत्र}

[उपमानपरीक्षाप्रकरणम्]

२.१.४५: अत्यन्तप्रायैकदेशसाधर्म्यात् उपमानासिद्धिः

{सिद्धान्त-सूत्र}

२.१.४६: प्रसिद्धसाधर्म्यात् उपमानसिद्धेः यथोक्तदोषानुपपत्तिः

{पूर्वपक्ष-सूत्र}

२.१.४७: प्रत्यक्षेण अप्रत्यक्षसिद्धेः

{सिद्धान्त-सूत्र}

२.१.४८: न अप्रत्यक्षे गवये प्रमाणार्थम् उपमानस्य पश्यामः

{सिद्धान्त-सूत्र}

२.१.४९: तथा इति उपसंहारात् उपमानसिद्धेः न अविशेषः

{सिद्धान्त-सूत्र}

[शब्दसामान्यपरीक्षाप्रकरणम्]

२.१.५०: शब्दः अनुमानम् अर्थस्य अनुपलब्धेः अनुमेयत्वात्

{पूर्वपक्ष-सूत्र}

२.१.५१: उपलब्धेः अद्विप्रवृत्तित्वात्

{पूर्वपक्ष-सूत्र}

२.१.५२: सम्बन्धात् च

{पूर्वपक्ष-सूत्र}

२.१.५३: आप्तोपदेशसामर्थ्यात् शब्दात् अर्थसम्प्रत्ययः

{सिद्धान्त-सूत्र}

२.१.५४: पूरणप्रदाहपाटनानुपलब्धेः च सम्बन्धाभावः

{सिद्धान्त-सूत्र}

२.१.५५: शब्दार्थव्यवस्थानात् अप्रतिषेधः

{सिद्धान्त-सूत्र}

२.१.५६: न, सामयिकत्वात् शब्दार्थसम्प्रत्ययस्य

{सिद्धान्त-सूत्र}

२.१.५७: जातिविशेषे च अनियमात्

{सिद्धान्त-सूत्र}

[शब्दविशेषपरीक्षाप्रकरणम्]

२.१.५८: तदप्रामाण्यम् अनृतव्याघातपुनरुक्तदोषेभ्यः

{सिद्धान्त-सूत्र}

२.१.५९: न, कर्मकर्तृसाधनवैगुण्यात्

{सिद्धान्त-सूत्र}

२.१.६०: अभ्युपेत्य कालभेदे दोषवचनात्

{सिद्धान्त-सूत्र}

२.१.६१: अनुवादोपपत्तेः च

{सिद्धान्त-सूत्र}

२.१.६२: वाक्यविभागस्य च अर्थग्रहणात्

{सिद्धान्त-सूत्र}

२.१.६३: विध्यर्थवादानुवादवचनविनियोगात्

{सिद्धान्त-सूत्र}

२.१.६४: विधिः विधायकः

{सिद्धान्त-सूत्र}

२.१.६५: स्तुतिः निन्दा परकृतिः पुराकल्पः इति अर्थवादः

{सिद्धान्त-सूत्र}

{अर्थवाद-भेदः}

२.१.६६: विधिविहितस्य अनुवचनम् अनुवादः

{अर्थवाद-}

२.१.६७: न अनुवादपुनरुक्तयोः विशेषः, शब्दाभ्यासोपपत्तेः

{सिद्धान्त-सूत्र}

२.१.६८: शीघ्रतरगमनोपदेशवत् अभ्यासात् न अविशेषः

{सिद्धान्त-सूत्र}

२.१.६९: मन्त्रायुर्वेदप्रामाण्यवत् च तत्प्रामाण्यम्, आप्तप्रामाण्यात्

{सिद्धान्त-सूत्र}

(इति न्यायसूत्रे द्वितीयाध्यायस्य प्रथमम् आह्निकम्)

(द्वितीयम् आह्निकम्)

[प्रमाणचतुष्ट्वपरीक्षाप्रकरणम्]

२.२.१: न चतुष्ट्वम्, ऐतिह्यार्थापत्तिसम्भवाभावप्रामाण्यात्

{पूर्वपक्ष-सूत्र}

२.२.२: शब्दे ऐतिह्यानर्थान्तरभावात् अनुमाने अर्थापत्तिसम्भवाभावानर्थान्तर भावात् च अप्रतिषेधः

{सिद्धान्त-सूत्र}

२.२.३: अर्थापत्तिः अप्रमाणम् अनैकान्तिकत्वात्

{अर्थापत्तिप्रामाण्यपरीक्षा}

२.२.४: अनर्थापत्तौ अर्थापत्त्यभिमानात्

{नानैकान्तिकत्वमर्थापत्तेः}

२.२.५: प्रतिषेधाप्रामाण्यं च अनैकान्तिकत्वात्

(-)

२.२.६: तत्प्रामाण्ये वा न अर्थापत्त्यप्रामाण्यम्

{सिद्धान्त-सूत्र}

[अभावप्रामाण्यसिद्धिः - अवान्तरप्रकरणम्]

२.२.७: न अभावप्रामाण्यं प्रमेयासिद्धेः

{पूर्वपक्ष-सूत्र}

२.२.८: लक्षितेष्वलक्षणलक्षितत्वात् अलक्षितानां तत्प्रमेयसिद्धेः

{उदाहरण सूत्र}

२.२.९: असति अर्थे न अभावः इति चेत् न, अन्यलक्षणोपपत्तेः

{सिद्धान्त-सूत्र}

२.२.१०: तत्सिद्धेः अलक्षितेषु अहेतुः

{पूर्वपक्ष-सूत्र}

२.२.११: न, लक्षणावस्थितापेक्षसिद्धेः

{सिद्धान्त-सूत्र}

२.२.१२: प्राक् उत्पत्तेः अभावोपपत्तेः च

{सिद्धान्त-सूत्र}

[शब्दानित्यत्वपरीक्षाप्रकरणम्(१३-३९)]

२.२.१३: आदिमत्वात् ऐन्द्रियकत्वात् कृतकवत् उपचारात् च

{शब्दानित्यत्व-प्रतिपादन-सूत्र}

२.२.१४: न, घटाभावसामान्यनित्यत्वात् नित्येषु अपि अनित्यवत् उपचारात् च

{सिद्धान्त-सूत्र}

२.२.१५: तत्त्वभाक्तयोः नानात्वविभागात् अव्यभिचारः

{शब्दानित्यत्व-प्रतिपादन-सूत्र}

{सिद्धान्त-सूत्र}

२.२.१६: सन्तानानुमानविशेषणात्

{शब्दानित्यत्व-प्रतिपादन-सूत्र}

{सिद्धान्त-सूत्र}

२.२.१७: कारणद्रव्यस्य प्रदेशशब्देनाभिधानात्

{शब्दानित्यत्व-प्रतिपादन-सूत्र}

{सिद्धान्त-सूत्र}

२.२.१८: प्राक् उच्चारणात् अनुपलब्धेः आवरणाद्यनुपलब्धेः च

{शब्दानित्यत्व-प्रतिपादन-सूत्र}

२.२.१९: तदनुपलब्धेः अनुपलम्भात् आवरणोपपत्तिः

{शब्दानित्यत्व-प्रतिपादन-सूत्र}

२.२.२०: अनुपलम्भात् अनुपलब्धिसद्भावात् न आवरणानुपपत्तिः अनुपलम्भात्

{सिद्धान्त-सूत्र}

२.२.२१: अनुपलम्भात्मकत्वात् अनुपलब्धेः अहेतुः

{सिद्धान्त-सूत्र}

२.२.२२: अस्पर्शत्वात्

{सिद्धान्त-सूत्र}

२.२.२३: न, कर्मानित्यत्वात्

{सिद्धान्त-सूत्र}

२.२.२४: न, अणुनित्यत्वात्

{सिद्धान्त-सूत्र}

२.२.२५: सम्प्रदानात्

{सिद्धान्त-सूत्र}

२.२.२६: तदन्तरालानुपलब्धेः अहेतुः

{सिद्धान्त-सूत्र}

२.२.२७: अध्यापनात् अप्रतिषेधः

{सिद्धान्त-सूत्र}

२.२.२८: उभयोः पक्षयोः अन्यतरस्य अध्यापनात् अप्रतिषेधः

{सिद्धान्त-सूत्र}

२.२.२९: अभ्यासात्

{सिद्धान्त-सूत्र}

२.२.३०: न अन्यत्वे अपि अभ्यासस्य उपचारात्

{सिद्धान्त-सूत्र}

२.२.३१: अन्यत् अन्यस्मात् अनन्यत्वात् अनन्यत् इति अन्यताऽभावः

{सिद्धान्त-सूत्र}

२.२.३२: तदभावे न अस्ति अनन्यता, तयोः इतरेतरापेक्षसिद्धेः

{सिद्धान्त-सूत्र}

२.२.३३: विनाशकारणानुपलब्धेः

{सिद्धान्त-सूत्र}

२.२.३४: अश्रवणकारणानुपलब्धेः सततश्रवणप्रसङ्गः

{सिद्धान्त-सूत्र}

२.२.३५: उपलभ्यमाने च अनुपलब्धेः असत्त्वात् अनपदेशः

{सिद्धान्त-सूत्र}

२.२.३६: पाणिनिमित्तप्रश्लेषात् शब्दाभावे न अनुपलब्धिः

{सिद्धान्त-सूत्र}

२.२.३७: विनाशकारणानुपलब्धेः च अवस्थाने तन्नित्यत्वप्रसङ्गः

{सिद्धान्त-सूत्र}

२.२.३८: अस्पर्शत्वात् अप्रतिषेधः

{सिद्धान्त-सूत्र}

२.२.३९: विभक्त्यन्तरोपपत्तेः च समासे

{सिद्धान्त-सूत्र}

[शब्दपरिणामपरीक्षाप्रकरणम्(४०-५६)]

२.२.४०: विकारादेशोपदेशात् संशयः

{पूर्वपक्ष-सूत्र}

२.२.४१: प्रकृतिविवृद्धौ विकारविवृद्धेः

{सिद्धान्त-सूत्र}

२.२.४२: न्यूनसमाधिकोपलब्धेः विकाराणाम् अहेतुः

{सिद्धान्त-सूत्र}

२.२.४३: द्विविधस्य अपि हेतोः अभावात् असाधनं दृष्टान्तः

{उदाहरणसूत्र}

२.२.४४: न, अतुल्यप्रकृतीनाम् विकारविकल्पात्

{सिद्धान्त-सूत्र}

२.२.४५: द्रव्यविकारवैषम्यवत् वर्णविकारविकलः

{पूर्वपक्ष-सूत्र}

२.२.४६: न, विकारधर्मानुपपत्तेः

{सिद्धान्त-सूत्र}

२.२.४७: विकारप्राप्तानाम् अपुनरापत्तेः

{सिद्धान्त-सूत्र}

२.२.४८: सुवर्णादीनां पुनरापत्तेः अहेतुः

{पूर्वपक्ष-सूत्र}

२.२.४९: न, तद्विकाराणां सुवर्णभावाव्यतिरेकात्

{सिद्धान्त-सूत्र}

२.२.५०: वर्णत्वाव्यतिरेकात् वर्णविकाराणाम् अप्रतिषेधः

{सिद्धान्त-सूत्र}

२.२.५१: सामान्यवतो धर्मयोगो न सामान्यस्य

{सिद्धान्त-सूत्र}।

२.२.५२: नित्यत्वे अविकारात् अनित्यत्वे च अनवस्थानात्

{सिद्धान्त-सूत्र}

२.२.५३: नित्यानाम् अतीन्द्रियत्वात् तद्धर्मविकल्पात् च वर्णविकाराणाम् अप्रतिषेधः

{पूर्वपक्ष-सूत्र}

२.२.५४: अनवस्थायित्वे च वर्णोपलब्धिवत् तद्विकारोपपत्तिः

{पूर्वपक्ष-सूत्र}

२.२.५५: विकारधर्मित्वे नित्यत्वाभावात् कालान्तरे विकारोपपत्तेः च अप्रतिषेधः

{सिद्धान्त-सूत्र}

२.२.५६: प्रकृत्यनियमात्

{सिद्धान्त-सूत्र}

२.२.५७: अनियमे नियमात् न अनियमः

{पूर्वपक्ष-सूत्र}

२.२.५८: नियमानियमविरोधात् अनियमे नियमात् च अप्रतिषेधः

{सिद्धान्त-सूत्र}

२.२.५९: गुणान्तरापत्त्युपमर्द-ह्रास-वृद्धि-श्लेषेभ्यः तु विकारोपपत्तेः वर्णविकाराः

{सिद्धान्त-सूत्र}

[शब्दशक्तिपरीक्षाप्रकरणम्]

२.२.६०: ते विभक्त्यन्ताः पदम्

{पद-लक्षण-सूत्रम्}

२.२.६१: व्यक्त्याकृतिजातिसन्निधौ उपचारात् संशयः

{पूर्वपक्ष-सूत्र}

[व्यक्तिवाद-अवान्तरप्रकरणम्]

२.२.६२: याशब्द-समूह-त्याग-परिग्रह-सङ्ख्या-वृद्ध्यपचय-वर्ण-समासानुबन्धानाम् व्यक्तौ उपचारात् व्यक्तिः

{पूर्वपक्ष-सूत्र}

२.२.६३: न, तत् अनवस्थानात्

{सिद्धान्त-सूत्र}

२.२.६४: सहचरण-स्थान-तादर्थ्य-वृत्त-मान-धारण-सामीप्य-योग-साधनाधिपत्येभ्यः ब्राह्मण-मञ्च-कट-राज-सक्तु-चन्दन-गङ्गा-शाटकान्न-पुरुषेष्वतद्भावे अपि तदुपचारः

{सिद्धान्त-सूत्र}

[आकृतिवाद-अवान्तरप्रकरणम्]

२.२.६५: आकृतिः, तदपेक्षत्वात् सत्त्वव्यवस्थानसिद्धेः

{पूर्वपक्ष-सूत्र}

[जातिवाद-अवान्तरप्रकरणम्]

२.२.६६: व्यक्त्याकृतियुक्ते अपि अप्रसङ्गात् प्रोक्षणादिनां मृद्गवके जातिः

{पूर्वपक्ष-सूत्र}

२.२.६७: न, आकृतिव्यक्त्यपेक्षत्वात् जात्यभिव्यक्तेः

{सिद्धान्त-सूत्र}

[सिद्धान्तवाद-अवान्तरप्रकरणम्]

२.२.६८: व्यक्त्याकृतिजातयः तु पदार्थः

{सिद्धान्त-सूत्र}

२.२.६९: व्यक्तिः गुणविशेषाश्रयः मूर्तिः

{सिद्धान्त-सूत्र}

२.२.७०: आकृतिः जातिलिङ्गाख्या

{सिद्धान्त-सूत्र}

२.२.७१: समानप्रसवात्मिका जातिः

{सिद्धान्त-सूत्र}

(इति न्यायसूत्रे द्वितीयाध्यायस्य द्वितीयम् आह्निकम्)

समाप्तः च अयम् द्वितीयाध्यायः

(अथ तृतीयः अध्यायः)

(प्रथमम् आह्निकम्)

[इन्द्रियव्यतिरिक्तात्मपरीक्षाप्रकरणं(१-३)]

३.१.१: दर्शनस्पर्शनाभ्याम् एकार्थग्रहणात्

{पूर्वपक्ष-सूत्र}

३.१.२: न, विषयव्यवस्थानात्

{पूर्वपक्ष-सूत्र}

३.१.३: तद्व्यवस्थानात् एव आत्मसद्भावात् अप्रतिषेधः

{सिद्धान्त-सूत्र}

[शरीरव्यतिरिक्तात्मपरीक्षाप्रकरणम्]

३.१.४: शरीरदाहे पातकाभावात्

{सिद्धान्त-सूत्र}

३.१.५: तदभावः सात्मकप्रदाहे अपि, तन्नित्यत्वात्

{पूर्वपक्ष-सूत्र}

३.१.६: न, कार्याश्रयकर्तृवधात्

{सिद्धान्त-सूत्र}

[प्रासङ्गिकं चक्षुरद्वैतपरीक्षाप्रकरणम्(७-१४)]

३.१.७: सव्यदृष्टस्य इतरेण प्रत्यभिज्ञानात्

{सिद्धान्त-सूत्र}

३.१.८: न एकस्मिन् नासास्थिव्यवहिते द्वित्वाभिमानात्

{पूर्वपक्ष-सूत्र}

३.१.९: एकविनाशे द्वितीयाविनाशात् न एकत्वम्

{सिद्धान्त-सूत्र}

३.१.१०: अवयवनाशे अपि अवयव्युपलब्धेः अहेतुः

{पूर्वपक्ष-सूत्र}

३.१.११: दृष्टान्तविरोधात् अप्रतिषेधः

{सिद्धान्त-सूत्र}

३.१.१२: इन्द्रियान्तरविकारात्

{सिद्धान्त-सूत्र}

३.१.१३: न, स्मृतेः स्मर्त्तव्यविषयत्वात्

{पूर्वपक्ष-सूत्र}

३.१.१४: तदात्मगुणसद्भावात् अप्रतिषेधः

{सिद्धान्त-सूत्र}

[आत्ममनोभेदपरीक्षाप्रकरणम्(१५-१७)]

३.१.१५: न, आत्मप्रतिपत्तिहेतूनां मनसि सम्भवात्

{पूर्वपक्ष-सूत्र}

३.१.१६: ज्ञातुः ज्ञानसाधनोपपत्तेः संज्ञाभेदमात्रम्

{सिद्धान्त-सूत्र}

३.१.१७: नियमः च निरनुमानः

{सिद्धान्त-सूत्र}

[आत्मनित्यत्वपरीक्षाप्रकरणम्(१८-२६)]

३.१.१८: पूर्वाभ्यस्तस्मृत्यनुबन्धात् जातस्य हर्षभयशोकसम्प्रतिपत्तेः

{सिद्धान्त-सूत्र}

३.१.१९: पद्मादिषु प्रबोधसम्मीलनविकारवत् तद्विकारः

{पूर्वपक्ष-सूत्र}

३.१.२०: न, उष्णशीतवर्षाकालनिमित्तत्वात् पञ्चात्मकविकाराणाम्

{सिद्धान्त-सूत्र}

३.१.२१: प्रेत्याहाराभ्यासकृतात् स्तन्याभिलाषात्

{सिद्धान्त-सूत्र}

३.१.२२: अयसः अयस्कान्ताभिगमनवत् तदुपसर्पणम्

{पूर्वपक्ष-सूत्र}

३.१.२३: न, अन्यत्र प्रवृत्त्यभावात्

{सिद्धान्त-सूत्र}

३.१.२४: वीतरागजन्मादर्शनात्

{सिद्धान्त-सूत्र}

३.१.२५: सगुणद्रव्योत्पत्तिवत् तदुत्पत्तिः

{पूर्वपक्ष-सूत्र}

३.१.२६: न, सङ्कल्पनिमित्तत्वात् रागादीनाम्

{सिद्धान्त-सूत्र}

[शरीरपरीक्षाप्रकरणम्(२७-३१)]

३.१.२७: पार्थिवं गुणान्तरोपलब्धेः

{सिद्धान्त-सूत्र}

३.१.२८: पार्थिवाप्यतैजसं तद्गुणोपलब्धेः

{सिद्धान्त-सूत्र}

३.१.२९: निःश्वासोच्छ्वासोपलब्धेः चातुर्भौतिकम्

{पूर्वपक्ष-सूत्र}

३.१.३०: गन्धक्लेदपाकव्यूहावकाशदानेभ्यः पाञ्चभौतिकम्

{पूर्वपक्ष-सूत्र}

३.१.३१: श्रुतिप्रामाण्यात् च

{सिद्धान्त-सूत्र}

[इन्द्रियपरीक्षाप्रकरणम्(३२-५१)]

३.१.३२: कृष्णसारे सति उपलम्भात् व्यतिरिच्य च उपलम्भात् संशयः

{सिद्धान्त-सूत्र}

३.१.३३: महदणुग्रहणात्

{साङ्ख्यमतखण्डनम्}

३.१.३४: रश्म्यर्थसन्निकर्षविशेषात् तद्ग्रहणम्

{सिद्धान्त-सूत्र}

३.१.३५: तदनुपलब्धेः अहेतुः

{सिद्धान्त-सूत्र}

३.१.३६: न अनुमीयमानस्य प्रत्यक्षतः अनुपलब्धिः अभावहेतुः

{सिद्धान्त-सूत्र}

३.१.३७: द्रव्यगुणधर्मभेदात् च उपलब्धिनियमः

{सिद्धान्त-सूत्र}

३.१.३८: अनेकद्रव्यसमवायात् रूपविशेषात् च रूपोपलब्धिः

{सिद्धान्त-सूत्र}

३.१.३९: कर्मकारितः च इन्द्रियाणां व्यूहः पुरुषार्थतन्त्रः

{सिद्धान्त-सूत्र}

३.१.४०: मध्यन्दिनोल्काप्रकाशानुपलब्धिवत् तदनुपलब्धिः

{सिद्धान्त-सूत्र}

३.१.४१: न, रात्रौ अपि अनुपलब्धेः

{सिद्धान्त-सूत्र}

३.१.४२: बाह्यप्रकाशानुग्रहात् विषयोपलब्धेः अनभिव्यक्तितः अनुपलब्धिः

{सिद्धान्त-सूत्र}

३.१.४३: अभिव्यक्तौ च अभिभवात्

{सिद्धान्त-सूत्र}

३.१.४४: नक्तञ्चरनयनरश्मिदर्शनात् च

{सिद्धान्त-सूत्र}

३.१.४५: अप्राप्यग्रहणं काचाभ्रपटलस्फटिकान्तरितोपलब्धेः

{पूर्वपक्ष-सूत्र}

३.१.४६: कुड्यान्तरितानुपलब्धेः अप्रतिषेधः

{सिद्धान्त-सूत्र}

३.१.४७: अप्रतीघातात् सन्निकर्षोपपत्तिः

{सिद्धान्त-सूत्र}

३.१.४८: आदित्यरश्मेः स्फटिकान्तरिते अपि दाह्ये अविघातात्

{सिद्धान्त-सूत्र}

३.१.४९: न इतरेतरधर्मप्रसङ्गात्

{पूर्वपक्ष-सूत्र}

३.१.५०: आदर्शोदकयोः प्रसादस्वाभाव्यात् रूपोपलब्धिः

{सिद्धान्त-सूत्र}

३.१.५१: दृष्टानुमितानां हि नियोगप्रतिषेधानुपपत्तिः

{सिद्धान्त-सूत्र}

[इन्द्रियनानात्वपरीक्षाप्रकरणम्(५२-६२)]

३.१.५२: स्थानान्यत्वे नानात्वात् अवयविनानास्थानत्वात् च संशयः

{सिद्धान्त-सूत्र}

३.१.५३: त्वक् अव्यतिरेकात्

{पूर्वपक्ष-सूत्र}

३.१.५४: न युगपत् अर्थानुपलब्धेः

{सिद्धान्त-सूत्र}

३.१.५५: विप्रतिषेधात् च न त्वक् एका

{सिद्धान्त-सूत्र}

३.१.५६: इन्द्रियार्थपञ्चत्वात्

{सिद्धान्त-सूत्र}

३.१.५७: न, तदर्थबहुत्वात्

{पूर्वपक्ष-सूत्र}

३.१.५८: गन्धत्वाद्यव्यतिरेकात् गन्धादीनामप्रतिषेधः

{सिद्धान्त-सूत्र}

३.१.५९: विषयत्वाव्यतिरेकात् एकत्वम्

{सिद्धान्त-सूत्र}

३.१.६०: न, बुद्धिलक्षणाधिष्ठान-गत्याकृति-जातिपञ्चत्वेभ्यः

{सिद्धान्त-सूत्र}

३.१.६१: भूतगुणविशेषोपलब्धेः तादात्म्यम्

{सिद्धान्त-सूत्र}

[अर्थपरीक्षाप्रकरणम्(६२-७४)]

३.१.६२: गन्ध-रस-रूप-स्पर्श-शब्दानां स्पर्शपर्यन्ताः पृथिव्याः

{सिद्धान्त-सूत्र}

३.१.६३: अप्-तेजो-वायूनां पूर्वं पूर्वम् अपोह्य आकाशस्य उत्तरः

{पूर्वपक्ष-सूत्र}

३.१.६४: न, सर्वगुणानुपलब्धेः

{सिद्धान्त-सूत्र}

३.१.६५: एकैकश्येन उत्तरगुणासद्भावात् उत्तरोत्तराणां तदनुपलब्धिः

{पूर्वपक्ष-सूत्र}

३.१.६६: विष्टं हि अपरं परेण

{पूर्वपक्ष-सूत्र}

३.१.६७: न, पार्थिवाप्ययोः प्रत्यक्षत्वात्

{सिद्धान्त-सूत्र}

३.१.६८: पूर्वपूर्वगुणोत्कर्षात् तत्तत् प्रधानम्

{सिद्धान्त-सूत्र}

३.१.६९: तद्ध्यवस्थानं तु भूयस्त्वात्

{सिद्धान्त-सूत्र}

३.१.७०: सगुणानाम् इन्द्रियभावात्

{सिद्धान्त-सूत्र}

३.१.७१: तेन एव तस्य अग्रहणात् च

{सिद्धान्त-सूत्र}

३.१.७२: न, शब्दगुणोपलब्धेः

{पूर्वपक्ष-सूत्र}

३.१.७३: तदुपलब्धिः इतरेतरद्रव्यगुणवैधर्म्यात्

{सिद्धान्त-सूत्र}

(इति न्यायसूत्रे तृतीयाध्यायस्य प्रथमम् आह्निकम्)

(द्वितीयम् आह्निकम्)

[बुद्धेरनित्यत्वपरीक्षाप्रकरणम्(१-९)]

३.२.१: कर्माकाशसाधर्म्यात् संशयः

{सिद्धान्त-सूत्र}

३.२.२: विषयप्रत्यभिज्ञानात्

{सिद्धान्त-सूत्र}

३.२.३: साध्यसमत्वात् अहेतुः

{सिद्धान्त-सूत्र}

३.२.४: न, युगपत् अग्रहणात्

{सिद्धान्त-सूत्र}

३.२.५: अप्रत्यभिज्ञाने च विनाशप्रसङ्गः

{सिद्धान्त-सूत्र}

३.२.६: क्रमवृत्तित्वात् अयुगपत् ग्रहणम्

{सिद्धान्त-सूत्र}

३.२.७: अप्रत्यभिज्ञानं च विषयान्तरव्यासङ्गात्

{सिद्धान्त-सूत्र}

३.२.८: न, गत्यभावात्

{सिद्धान्त-सूत्र}

३.२.९: स्फटिकान्यत्वाभिमानवत् तदन्यत्वाभिमानः

{सिद्धान्त-सूत्र}

[क्षणभङ्गपरीक्षाप्रकरणम्(१०-१७)]

३.२.१०: स्फटिके अपि अपरापरोत्पत्तेः क्षणिकत्वात् व्यक्तीनाम् अहेतुः

{सिद्धान्त-सूत्र}

३.२.११: नियमहेत्वभावात् यथादर्शनम् अभ्यनुज्ञा

{सिद्धान्त-सूत्र}

३.२.१२: न, उत्पत्तिविनाशकारणोपलब्धेः

{सिद्धान्त-सूत्र}

३.२.१३: क्षीरविनाशे कारणानुपलब्धिवत् दध्युत्पत्तिवत् च तदुत्पत्तिः

{पूर्वपक्ष-सूत्र}

३.२.१४: लिङ्गतः ग्रहणात् न अनुपलब्धिः

{सिद्धान्त-सूत्र}

३.२.१५: न पयसः परिणाम-गुणान्तरप्रादुर्भावात्

{सिद्धान्त-सूत्र}

३.२.१६: व्यूहान्तरात् द्रव्यान्तरोत्पत्तिदर्शनं पूर्वद्रव्यनिवृत्तेः अनुमानम्

{सिद्धान्त-सूत्र}

३.२.१७: क्वचित् विनाशकारणानुपलब्धेः क्वचित् च उपलब्धेः अनेकान्तः

{सिद्धान्त-सूत्र}

[बुद्धेरात्मगुणत्वपरीक्षाप्रकरणाम्(१८-४१)]

३.२.१८: न इन्द्रियार्थयोः, तद्विनाशे अपि ज्ञानावस्थानात्

{सिद्धान्त-सूत्र}

३.२.१९: युगपत् ज्ञानानुपलब्धेः च न मनसः

{सिद्धान्त-सूत्र}

३.२.२०: तत् आत्मगुणत्वे अपि तुल्यम्

{पूर्वपक्ष-सूत्र}

३.२.२१: इन्द्रियैः मनसः सन्निकर्षाभावात् तदनुत्पत्तिः

{पूर्वपक्ष-सूत्र}

३.२.२२: न, उत्पत्तिकारणानपदेशात्

{सिद्धान्त-सूत्र}

३.२.२३: विनाशकारणानुपलब्धेः च अवस्थाने तन्नित्यत्वप्रसङ्गः

{पूर्वपक्ष-सूत्र}

३.२.२४: अनित्यत्वग्रहात् बुद्धेः बुद्ध्यन्तरात् विनाशः शब्दवत्

{सिद्धान्त-सूत्र}

३.२.२५: ज्ञानसमवेतात्मप्रदेशसन्निकर्षात् मनसः स्मृत्युत्पत्तेः न युगपत् उत्पत्तिः

{पूर्वपक्ष-सूत्र}

३.२.२६: न, अन्तः-शरीरवृत्तित्वात् मनसः

{सिद्धान्त-सूत्र}

३.२.२७: साध्यत्वात् अहेतुः

{पूर्वपक्ष-सूत्र}

३.२.२८: स्मरतः शरीरधारणोपपत्तेः अप्रतिषेधः

{सिद्धान्त-सूत्र}

३.२.२९: न, तदाशुगतित्वान्मनसः

{पूर्वपक्ष-सूत्र}

३.२.३०: न, स्मरणकालानियमात्

{सिद्धान्त-सूत्र}

३.२.३१: आत्मप्रेरण-यदृच्छा-ज्ञताभिः च न संयोगविशेषः

{पूर्वपक्ष-सूत्र}

३.२.३२: व्यासक्तमनसः पादव्यथनेन संयोगविशेषेण समानम्

{सिद्धान्त-सूत्र}

३.२.३३: प्रणिधानलिङ्गादिज्ञानानाम् अयुगपद्भावात् अयुगपत्स्मरणम्

{सिद्धान्त-सूत्र}

३.२.३४: ज्ञस्य इच्छाद्वेषनिमित्तत्वात् आरम्भनिवृत्त्योः

{सिद्धान्त-सूत्र}

३.२.३५: तल्लिङ्गत्वात् इच्छाद्वेषयोः पार्थिवाद्येषु अप्रतिषेधः

{पूर्वपक्ष-सूत्र}

३.२.३६: परश्वादिषु आरम्भनिवृत्तिदर्शनात्

{सिद्धान्त-सूत्र}

३.२.३७: नियमानियमौ तु तद्विशेषकौ

{सिद्धान्त-सूत्र}

३.२.३८: यथोक्तहेतुत्वात् पारतन्त्र्यात् अकृताभ्यागमात् च न मनसः

{सिद्धान्त-सूत्र}

३.२.३९: परिशेषात् यथोक्तहेतूपपत्तेः च

{सिद्धान्त-सूत्र}

३.२.४०: स्मरणं तु आत्मनः ज्ञस्वाभाव्यात्

{सिद्धान्त-सूत्र}

३.२.४१: प्रणिधान-निबन्धाभ्यास-लिङ्ग-लक्षण-सादृश्य-परिग्रहाश्रयाश्रित सम्बन्धानन्तर्य-वियोगैककार्य-विरोधातिशय-प्राप्ति-व्यवधान-सुख-दुःखेच्छा द्वेष-भयार्थित्व-क्रियाराग-धर्माधर्मनिमित्तेभ्यः

{सिद्धान्त-सूत्र}

[बुद्धेरुत्पन्नापवर्गित्वपरीक्षाप्रकरणम्(४२-४५)]

३.२.४२: कर्मानवस्थायिग्रहणात्

{सिद्धान्त-सूत्र}

३.२.४३: अव्यक्तग्रहणम् अनवस्थायित्वात् विद्युत्सम्पाते रूपाव्यक्तग्रहणवत्

{सिद्धान्त-सूत्र}

३.२.४४: हेतूपादानात् प्रतिषेद्धव्याभ्यनुज्ञा

{सिद्धान्त-सूत्र}

३.२.४५: न प्रदीपार्चिःसन्तत्यभिव्यक्तग्रहणवत् तद्ग्रहणम्

{सिद्धान्त-सूत्र}

[बुद्धेः शरीरगुणव्यतिरेकपरीक्षाप्रकरणम्(४६-५५)]

३.२.४६: द्रव्ये स्वगुणपरगुणोपलब्धेः संशयः

{सिद्धान्त-सूत्र}

३.२.४७: यावच्छरीरभावित्वात् रूपादीनाम्

{सिद्धान्त-सूत्र}

३.२.४८: न, पाकजगुणान्तरोत्पत्तेः

{सिद्धान्त-सूत्र}

३.२.४९: प्रतिद्वन्द्विसिद्धेः पाकजानाम् अप्रतिषेधः

{सिद्धान्त-सूत्र}

३.२.५०: शरीरव्यापित्वात्

{सिद्धान्त-सूत्र}

३.२.५१: न, केशनखादिषु अनुपलब्धेः

{पूर्वपक्ष-सूत्र}

३.२.५२: त्वक्पर्यन्तत्वात् शरीरस्य केशनखादिषु अप्रसङ्गः

{सिद्धान्त-सूत्र}

३.२.५३: शरीरगुणवैधर्म्यात्

{सिद्धान्त-सूत्र}

३.२.५४: न, रूपादीनाम् इतरेतरवैधर्म्यात्

{पूर्वपक्ष-सूत्र}

३.२.५५: ऐन्द्रियकत्वात् रूपादीनाम् अप्रतिषेधः

{सिद्धान्त-सूत्र}

[मनःपरीक्षाप्रकरणम्(५६-५९)]

३.२.५६: ज्ञानायौगपद्यात् एकम् मनः

{सिद्धान्त-सूत्र}

३.२.५७: न, युगपत् अनेकक्रियोपलब्धेः

{पूर्वपक्ष-सूत्र}

३.२.५८: अलातचक्रदर्शनवत् तदुपलब्धिः आशुसञ्चारात्

{सिद्धान्त-सूत्र}

३.२.५९: यथोक्तहेतुत्वात् च अणु

{सिद्धान्त-सूत्र}

[अदृष्टनिष्पाद्यत्वपरीक्षाप्रकरणम्(६०-७२)]

३.२.६०: पूर्वकृतफलानुबन्धात् तदुत्पत्तिः

{सिद्धान्त-सूत्र}

३.२.६१: भूतेभ्यः मूर्त्युपादानवत् तदुपादानम्

{पूर्वपक्ष-सूत्र}

३.२.६२: न, साध्यसमत्वात्

{सिद्धान्त-सूत्र}

३.२.६३: न, उत्पत्तिनिमित्तत्वात् मातापित्रोः

{सिद्धान्त-सूत्र}

३.२.६४: तथा आहारस्य

{सिद्धान्त-सूत्र}

३.२.६५: प्राप्तौ च अनियमात्

{सिद्धान्त-सूत्र}

३.२.६६: शरीरोत्पत्तिनिमित्तवत् संयोगोत्पत्तिनिमित्तं कर्म

{सिद्धान्त-सूत्र}

३.२.६७: एतेन अनियमः प्रत्युक्तः

{सिद्धान्त-सूत्र}

३.२.६८: तत् अदृष्टकारितम् इति चेत् पुनः तत्प्रसङ्गः अपवर्गे

{सिद्धान्त-सूत्र}

३.२.६९: मनःकर्मनिमित्तत्वात् च संयोगाव्युच्छेदः

{सिद्धान्त-सूत्र}

३.२.७०: नित्यत्वप्रसङ्गः च प्रायणानुपपत्तेः

{सिद्धान्त-सूत्र}

३.२.७१: अणुश्यामतानित्यत्ववत् एतत् स्यात्

{पूर्वपक्ष-सूत्र}

३.२.७२: न, अकृताभ्यागमप्रसङ्गात्

{सिद्धान्त-सूत्र}

(इति न्यायसूत्रे तृतीयाध्यायस्य द्वितीयम् आह्निकम्)

(समाप्तः च अयम् तृतीयः अध्यायः)

(अथ चतुर्थः अध्यायः)

(प्रथमम् आह्निकम्)

[प्रवृत्तिदोषसामान्यपरीक्षाप्रकरणम्(१-२)]

४.१.१: प्रवृत्तिर्यथोक्ता

{सिद्धान्त-सूत्र}

४.१.२: तथा दोषाः

{सिद्धान्त-सूत्र}

[दोषत्रैराश्यपरीक्षाप्रकरणम्(३-८)]

४.१.३: त्रैराश्यं रागद्वेषमोहार्थान्तर्भावात्

{सिद्धान्त-सूत्र}

४.१.४: न, एकप्रत्यनीकभावात्

{पूर्वपक्ष-सूत्र}

४.१.५: व्यभिचारादहेतुः

{सिद्धान्त-सूत्र}

४.१.६: तेषां मोहः पापीयान्, नामूढस्येतरोत्पत्तेः

{सिद्धान्त-सूत्र}

४.१.७: निमित्तनैमित्तिकभावादर्थान्तरभावो दोषेभ्यः

{पूर्वपक्ष-सूत्र}

४.१.८: न, दोषलक्षअणावरोधान्मोहस्य

{सिद्धान्त-सूत्र}

४.१.९: निमित्तनैमित्तिकोपपत्तेश्च तुल्यजातीयानामप्रतिषेधः

{सिद्धान्त-सूत्र}

[प्रेत्यभावपरीक्षाप्रकरणम्(१०-१३)]

४.१.१०: आत्मनित्यत्वे प्रेत्यभावसिद्धिः

{सिद्धान्त-सूत्र}

४.१.११: व्यक्ताद् व्यक्तानाम्, प्रत्यक्षप्रामाण्यात्

{सिद्धान्त-सूत्र}

४.१.१२ः न, घटाद् घटनिष्पत्तेः

{पूर्वपक्ष-सूत्र}

४.१.१३ः व्यक्ताद् घटनिष्पत्तेरप्रतिषेधः

{सिद्धान्त-सूत्र}

[शून्यतोपादाननिराकरणप्रकरणम्(१४-१८)]

४.१.१४ः अभावाद् भावोत्पत्तिः, नानुपमृद्य प्रादुर्भावात्

{पूर्वपक्ष-सूत्र}

४.१.१५ः व्याघातादप्रयोगः

{सिद्धान्त-सूत्र}

४.१.१६ः न, अतीतानागतयोः कारकशब्दप्रयोगात्

{पूर्वपक्ष-सूत्र}

४.१.१७ः न, विनष्टेभ्योऽनिष्पत्तेः

{सिद्धान्त-सूत्र}

४.१.१८ः क्रमनिर्देशादप्रतिषेधः

{सिद्धान्त-सूत्र}

[ईश्वरोपादानाताप्रकरणम्(१९-२१)]

४.१.१९ः ईश्वरः कारणम्, पुरुषकर्माफल्यदर्शनात्

{सिद्धान्त-सूत्र}

४.१.२०ः न, पुरुषकर्माभावे फ्लानिष्पत्तेः

{पूर्वपक्ष-सूत्र}

४.१.२१ः तत्कारितत्वाद् अहेतुः

{सिद्धान्त-सूत्र}

[आकस्मिकत्वनिराकरणप्रकरणम्(२२-२४)]

४.१.२२ः अनिमित्ततो भावोत्पत्तिः, कण्टकतैक्ष्ण्यादिदर्शनात्

{पूर्वपक्ष-सूत्र}

४.१.२३: अनिमित्तनिमित्तत्वान्ननिमित्ततः

{सिद्धान्त-सूत्र}

४.१.२४: निमित्तनिमित्तयोरर्थान्तरभावादप्रतिषेधः

{सिद्धान्त-सूत्र}

[सर्वानित्यत्वनिराकरणप्रकरणम्(२५-२८)]

४.१.२५: सर्वम् अनित्यम्, उत्पत्तिविनाशधर्मकत्वात्

{पूर्वपक्ष-सूत्र}

४.१.२६: न, अनित्यतानित्यत्वात्

{सिद्धान्त-सूत्र}

४.१.२७: तदनित्यत्वमग्नेर्दाह्यं विनाश्यानुविनाशवत्

{सिद्धान्त-सूत्र}

४.१.२८: नित्यस्याप्रत्याख्यानम्, यथोपलब्धि व्यवस्थानात्

{सिद्धान्त-सूत्र}

[सर्वनित्यत्वनिराकरणम्(२९-३३)]

४.१.२९: सर्वं नित्यम्, पञ्चभूतनित्यत्वात्

{पूर्वपक्ष-सूत्र}

४.१.३०: न, उत्पत्तिविनाशकारणोपलब्धेः

{सिद्धान्त-सूत्र}

४.१.३१: तल्लक्षणावरोधादप्रतिषेधः

{पूर्वपक्ष-सूत्र}

४.१.३२: न, उत्पत्तितत्कारणोपलब्धेः

{सिद्धान्त-सूत्र}

४.१.३३: न, व्यवस्थानुपपत्तेः

{सिद्धान्त-सूत्र}

[सर्वपृथक्त्वनिराकरणप्रकरणम्(३४-३६)]

४.१.३४: सर्वं पृथग्, भावलक्षणपृथक्त्वात्

{पूर्वपक्ष-सूत्र}

४.१.३५: न, अनेकलक्षणैरेकभावनिष्पत्तेः

{सिद्धान्त-सूत्र}

४.१.३६: लक्षणव्यवस्थानादेवाप्रतिषेधः

{सिद्धान्त-सूत्र}

[सर्वशून्यतानिराकरणप्रकरणम्(३७-४०)]

४.१.३७: सर्वम् अभावो भावेष्वितरेतराभावसिद्धेः

{पूर्वपक्ष-सूत्र}

४.१.३८: न, स्वभावसिद्धेर्भावानाम्

{सिद्धान्त-सूत्र}

४.१.३९: न स्वभावसिद्धिः, आपेक्षिकत्वात्

{पूर्वपक्ष-सूत्र}

४.१.४०: व्याहतत्वादयुक्तम्

{सिद्धान्त-सूत्र}

[संख्यैकान्तवादप्रकरणम्(४१-४३)]

४.१.४१: संख्यैकान्तासिद्धिः, कारणानुपपत्त्युपपत्तिभ्याम्

{सिद्धान्त-सूत्र}

४.१.४२: न, कारणवयवाभावात्

{पूर्वपक्ष-सूत्र}

४.१.४३: निरवयवत्वादहेतुः

{सिद्धान्त-सूत्र}

[फलपरीक्षाप्रकरणम्(४४-५४)]

४.१.४४: सद्यः कालान्तरे च फलनिष्पत्तेः संशयः

{सिद्धान्त-सूत्र}

४.१.४५: न सद्यः, कालान्तरोपभोग्यत्वात्

{सिद्धान्त-सूत्र}

४.१.४६: कालान्तरेणानिष्पत्तिहेतुर्विनाशात्

{पूर्वपक्ष-सूत्र}

४.१.४७: प्राङ्निष्पत्तेर्वृक्षफलवत् तत्स्यात्

{सिद्धान्त-सूत्र}

४.१.४८: नासन्न सन्न सदसत्, सदसतोर्वैधर्मयात्

{पूर्वपक्ष-सूत्र}

४.१.४९: उत्पादव्ययदर्शनात्

{सिद्धान्त-सूत्र}

४.१.५०: बुद्धिसिद्धं तु तदसत्

{सिद्धान्त-सूत्र}

४.१.५१: आश्रयव्यतिरेकाद् वृक्षफलोत्पत्तिवद् इत्यहेतुः

{पूर्वपक्ष-सूत्र}

४.१.५२: प्रीतेरात्माश्रयत्वादप्रतिषेधः

{सिद्धान्त-सूत्र}

४.१.५३: न पुत्रपशुस्त्रीपरिच्छेदहिरण्यान्नादिफलनिर्देशात्

{पूर्वपक्ष-सूत्र}

४.१.५४: तत्सम्बन्धात् फलनिष्पत्तेस्तेषु फलवदुपचारः

{सिद्धान्त-सूत्र}

[दुःखपरीक्षाप्रकरणम्(५५-५८)]

४.१.५५: विविधवाधनायोगाद् दुःखमेव जन्मोत्पत्तिः

{सिद्धान्त-सूत्र}

४.१.५६: न, सुखस्याप्यन्तरालनिष्पत्तेः

{सिद्धान्त-सूत्र}

४.१.५७: भाधनानिवृत्तेर्वेदयतः प्रेषणदोषादप्रतिषेधः

{सिद्धान्त-सूत्र}

४.१.५८: दुःखविकल्पे सुखाभिमानाच्च

{सिद्धान्त-सूत्र}

[अपवर्गपरीक्षाप्रकरणम्(५९-६८)]

४.१.५९: ऋणक्लेशप्रवृत्त्यनुब्धादपवर्गाभावः

{पूर्वपक्ष-सूत्र}

४.१.६०: प्रधानशब्दानुपपत्तेर्गुणशब्देनानुवादो निन्दाप्रशंसोपपत्तेः

{सिद्धान्त-सूत्र}

४.१.६१: समारोपणादात्मन्यप्रतिषेधः

{सिद्धान्त-सूत्र}

४.१.६२: पात्रचयान्तानुपपत्तेश्च फलाभावः

{सिद्धान्त-सूत्र}

४.१.६३: सुषुप्तस्य स्वप्नादर्शने क्लेशाभावादपवर्गः

{सिद्धान्त-सूत्र}

४.१.६४: न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्य

{सिद्धान्त-सूत्र}

४.१.६५: न, क्लेशसन्ततेः स्वाभाविकत्वात्

{पूर्वपक्ष-सूत्र}

४.१.६६: प्रागुत्पत्तेरभावानित्यत्ववत् स्वाभाविकेऽप्यनित्यत्वम्

{सिद्धान्त-सूत्र}

४.१.६७: अणुश्यामतानित्यत्ववद् वा

{सिद्धान्त-सूत्र}

४.१.६८: न, सङ्कल्पनिमित्तत्वाच्च रागादीनाम्

{सिद्धान्त-सूत्र}

(इति न्यायसूत्रे चतुर्थाध्यायस्य प्रथमम् आह्निकम्)

(द्वितीयम् आह्निकम्)

[तत्त्वज्ञानोत्पत्तिप्रकरणम्(१-३)]

४.२.१: दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिः

{सिद्धान्त-सूत्र}

४.२.२: दोषनिमित्तं रूपादयो विषयः सङ्कल्पकृताः

{सिद्धान्त-सूत्र}

४.२.३: तन्निमित्तं त्ववयव्यभिमानः

{सिद्धान्त-सूत्र}

[प्रासङ्गिकम् अवयविप्रकरणम्(४-१७)]

४.२.४: विद्याविद्याद्वैविध्यात् संशयः

{पूर्वपक्ष-सूत्र}

४.२.५: तदसंशयः, पूर्वहेतुप्रसिद्धत्वात्

{सिद्धान्त-सूत्र}

४.२.६: वृत्त्यनुपपत्तेरपि तर्हि न संशयः

{पूर्वपक्ष-सूत्र}

४.२.७: कृत्स्नैकदेशावृत्तित्वादवयवानामवयव्यभावः

{पूर्वपक्ष-सूत्र}

४.२.८: तेषु चावृत्तेरवयव्यभावः

{पूर्वपक्ष-सूत्र}

४.२.९: पृथक् चावयवेभ्योऽवृत्तेः

{सिद्धान्त-सूत्र}

४.२.१०: न चावयव्यवयवाः

{पूर्वपक्ष-सूत्र}

४.२.११: एकस्मिन् भेदाभावाद् भेदशब्दप्रयोगानुपपत्तेरप्रश्नः

{सिद्धान्त-सूत्र}

४.२.१२: अवयवान्तरभावेऽप्यवृत्तेरहेतुः

{सिद्धान्त-सूत्र}

४.२.१३: केशसमूहे तैमिरिकोपलब्धिवत् तदुपलब्धिः

{पूर्वपक्ष-सूत्र}

४.२.१४: स्वविषयानतिक्रमेणेन्द्रियस्य पटुमन्दभावाद्विषयग्रहणस्य तथाभाबो नाविषये प्रवृत्तिः

{सिद्धान्त-सूत्र}

४.२.१५: अवयवावयविप्रसङ्गश्चैवमाप्रलयात्

{सिद्धान्त-सूत्र}

४.२.१६: न प्रलयोऽणुसद्भावात्

{सिद्धान्त-सूत्र}

४.२.१७: परं वा त्रुटेः

{सिद्धान्त-सूत्र}

[औपोद्घातिकं निरवयवप्रकरणम्(१८-२५)]

४.२.१८: आकाशव्यतिभेदात् तदनुपपत्तिः

{सिद्धान्त-सूत्र}

४.२.१९: आकाशासर्वगतत्वं वा

{पूर्वपक्ष-सूत्र}

४.२.२०: अन्तर्बहिश्च कार्यद्रव्यस्य कारणान्तरवचनादकार्ये तदभावः

{सिद्धान्त-सूत्र}

४.२.२१: शब्दसंयोगविभावाच्च सर्वगतम्

{सिद्धान्त-सूत्र}

४.२.२२: अव्यूहाविष्टम्भविभुत्वानि चाकाशधर्माः

{सिद्धान्त-सूत्र}

४.२.२३: मूर्तिमतां च संस्थानोपपत्तेरवयवसद्भावः

{पूर्वपक्ष-सूत्र}

४.२.२४: संयोगोपपत्तेश्च

{पूर्वपक्ष-सूत्र}

४.२.२५: अनवस्थाकारित्वादनवस्थानुपपत्तेश्चाप्रतिषेधः

{सिद्धान्त-सूत्र}

[बाह्यार्थभङ्गनिराकरणप्रकरणम्(२६-३७)]

४.२.२६: बुद्ध्या विवेचनात्तु भावानां याथात्म्यानुपलब्धिस्तन्त्वपकर्षणे पटसद्भावानुपलब्धिवत् तदनुपलब्धिः

{पूर्वपक्ष-सूत्र}

४.२.२७: व्याहतत्वादहेतुः

{सिद्धान्त-सूत्र}

४.२.२८: तदाश्रयत्वादपृथग्ग्रहणम्

{सिद्धान्त-सूत्र}

४.२.२९: प्रमाणतश्चार्थप्रतिपत्तेः

{सिद्धान्त-सूत्र}

४.२.३०: प्रमाणानुपपत्त्युपपत्तिभ्याम्

{सिद्धान्त-सूत्र}

४.२.३१: स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमानः

{पूर्वपक्ष-सूत्र}

४.२.३२: मायागन्धर्वनगरमृगतृष्णिकावद्वा

{पूर्वपक्ष-सूत्र}

४.२.३३: हेत्वभावादसिद्धिः

{सिद्धान्त-सूत्र}

४.२.३४: स्मृतिसंकल्पवच्च स्वप्नविषयाभिमानः

{सिद्धान्त-सूत्र}

४.२.३५: मिथ्योपलब्धेर्विनाशस्तत्त्वज्ञानात्स्वप्नविषयाभिमानप्रणाशवत् प्रतिबोधे

{सिद्धान्त-सूत्र}

४.२.३६: बुद्धेश्चैवं निमित्तसद्भावोपलम्भात्

{सिद्धान्त-सूत्र}

४.२.३७: तत्त्वप्रधानभेदाच्च मिथ्याबुद्धेर्द्वैविध्योपपत्तिः

{सिद्धान्त-सूत्र}

[तत्त्वज्ञानविवृद्धिप्रकरणम्(३८-४९)]

४.२.३८: समाधिविशेषाभ्यासात्

{सिद्धान्त-सूत्र}

४.२.३९: न, अर्थविशेषप्रावल्यात्

{पूर्वपक्ष-सूत्र}

४.२.४०: क्षुदादिभिः प्रवर्तनाच्च

{पूर्वपक्ष-सूत्र}

४.२.४१: पूर्वकृतफलानुबन्धात् तदुत्पत्तिः

{सिद्धान्त-सूत्र}

४.२.४२: अरण्यगुहापुलिनादिषु योगाभ्यासोपदेशः

{सिद्धान्त-सूत्र}

४.२.४३: अपवर्गेऽप्येवं प्रसङ्गः

{पूर्वपक्ष-सूत्र}

४.२.४४: न, निष्पन्नावश्यम्भावित्वात्

{सिद्धान्त-सूत्र}

४.२.४५: तदभावश्चापवर्गे

{सिद्धान्त-सूत्र}

४.२.४६: तदर्थं यमनियमाभ्यासात्मसंस्कारो योगाच्चाध्यात्मविध्युपायैः

{सिद्धान्त-सूत्र}

४.२.४७: ज्ञानग्रहणाभ्यासस्तद्विद्यैश्च सह संवादः

{सिद्धान्त-सूत्र}

४.२.४८: तं शिष्यगुरुसब्रह्मचारिविशिष्टश्रेयोऽर्थिभिरनसूयिभिरभ्युपेयात्

{सिद्धान्त-सूत्र}

४.२.४९: प्रतिपक्षहीनम् अपि वा प्रयोजनार्थमर्थित्वे

[तत्त्वज्ञानपरिपालनप्रकरणम्(५०-५१)]

४.२.५०: तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे, बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत्

{सिद्धान्त-सूत्र}

४.२.५१: ताभ्यां विगृह्यकथनम्

{सिद्धान्त-सूत्र}

(इति न्यायसूत्रे चतुर्थाध्यायस्य द्वितीयम् आह्निकम्)

(समाप्तश्च चतुर्थः अध्यायः)

(अथ पञ्चमः अध्यायः)

(प्रथमम् आह्निकम्)

[सत्प्रतिपक्षदेशनाभासप्रकर्णम्(१-३)]

५.१.१: साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्य् अप्राप्तिप्रषङ्गप्रतिदृऋष्टान्तानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकआर्यसमाः

{सिद्धान्त-सूत्र}

५.१.२: साधर्म्यवैधर्म्याभ्यामुपसंहारे तद्धर्मविपर्ययोपपत्तेः साधर्म्यवैधर्म्यसमौ

{सिद्धान्त-सूत्र}

५.१.३: गोत्वाद् गोसिद्धिवत् तत्सिद्धिः

{सिद्धान्त-सूत्र}

उत्कर्षसमादिजातिषट्कप्रकरणम्(४-६)]

५.१.४: साध्यदृष्टान्तयोर्धर्मविकल्पादुभयसाध्यत्वाच्चोत्कर्षापकर्ष वर्ण्यविकल्पसाध्यसमाः

{सिद्धान्त-सूत्र}

५.१.५: किञ्चित्साधर्म्यादुपसंहारसिद्धेर्वैधर्म्यादप्रतिषेधः

{सिद्धान्त-सूत्र}

५.१.६: साध्यातिदेशाच्च दृष्टान्तोपपत्तेः

{सिद्धान्त-सूत्र}

[प्राप्त्यप्राप्तिसमजातिद्वयप्रकरणम्(७-८)]

५.१.७: प्राप्य साध्यमप्राप्य वा हेतोः प्राप्त्याऽविशिष्टत्वादप्राप्त्याऽसाधाक त्वाच्च प्राप्त्यप्राप्तिसमौ

{सिद्धान्त-सूत्र}

५.१.८: घटादिनिष्पत्तिदर्शनात् पीडने चाभिचारादप्रतिषेधः

{सिद्धान्त-सूत्र}

[प्रसङ्गप्रतिदृष्टान्तसमप्रकरणम्(९-११)]

५.१.९: ऋष्टान्तस्य कारणानपदेशात् प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन

प्रसङ्गप्रतिदृष्टान्तसमौ

{सिद्धान्त-सूत्र}

५.१.१०: प्रदीपोपादानप्रसङ्गनिवृत्तिवत् तद्विनिवृत्तिः

{सिद्धान्त-सूत्र}

५.१.११: प्रतिदृष्टान्तहेतुत्वे च नाहेतुर्दृष्टान्तः

{सिद्धान्त-सूत्र}

[अनुत्पत्तिसमप्रकरणम्(१२-१३)]

५.१.१२: प्रागुत्पत्तेः कारणाभावादनुत्पत्तिसमः

{सिद्धान्त-सूत्र}

५.१.१३: तथाभावादुत्पन्नस्य कारणोपपत्तेर्न कारणप्रतिषेधः

{सिद्धान्त-सूत्र}

[संशयसमप्रकरणम्(१४-१५)]

५.१.१४: सामान्यदृष्टान्तयोरैन्द्रियकत्वे समाने नित्यानित्यसाधर्म्यात् संशयसमः

{सिद्धान्त-सूत्र}

५.१.१५: साधर्म्यात्संशये न संशयो वैधर्म्यादुभयथा वा संशयेऽत्यन्त संशयप्रसङ्गो नित्यत्वानभ्यूपगमाच्च सामान्यस्याप्रतिषेधः

{सिद्धान्त-सूत्र}

[प्रकरणसमप्रकरणम्(१६-१७)]

५.१.१६: उभयसाधर्म्यात् प्रक्रियासिद्धेः प्रकरणसमः

{सिद्धान्त-सूत्र}

५.१.१७: प्रतिपक्षात् प्रकरणसिद्धेः प्रतिषेधानुपपत्तिः प्रतिपक्षोपपत्तेः

{सिद्धान्त-सूत्र}

[अहेतुसमप्रकरणम्(१८-२०)]

५.१.१८: त्रैकाल्यासिद्धेर्हेतोरहेतुसमः

{सिद्धान्त-सूत्र}

५.१.१९: न हेतुतः साध्यसिद्धेस्त्रैकाल्यास्सिद्धिः

{सिद्धान्त-सूत्र}

५.१.२०: प्रतिषेधानुपपत्तेश्च प्रतिषेद्धव्याप्रतिषेधः

{सिद्धान्त-सूत्र}

[अर्थापत्तिसमप्रकरणम्(२१-२२)]

५.१.२१: अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमः

{सिद्धान्त-सूत्र}

५.१.२२: अनुक्तस्यार्थापत्तेः पक्षहानेरुपपत्तिरनुक्तत्वादनैकान्तिकत्वाच् चार्थापत्तेः

{सिद्धान्त-सूत्र}

[अविशेषसमप्रकरणम्(२३-२४)]

५.१.२३: एकधर्मोपपत्तेरविशेषे सर्वाविशेषप्रसङ्गात्सद्भाबोपपत्तेर्-

अविशेषसमः

{सिद्धान्त-सूत्र}

५.१.२४: क्वचिद्धर्मानुपपत्तेः क्वचिच्चोपपत्तेः प्रतिषेधाभावः

{सिद्धान्त-सूत्र}

[उअपपत्तिसमप्रकरणम्(२५-२६)]

५.१.२५: उभयोकारणोपपत्तेरुपपत्तिसमः

{सिद्धान्त-सूत्र}

५.१.२६: उअपपत्तिकारणाभ्यनिञ्ज्ञानादप्रतिषेधः

{सिद्धान्त-सूत्र}

[उपलब्धिसमप्रकरणम्(२७-२८)]

५.१.२७: निर्दिष्टकारणाभावेऽप्युपलम्भादुपलब्धिसमः

{सिद्धान्त-सूत्र}

५.१.२८: कारणान्तरादपि तद्धर्मोपपत्तेरप्रतिषेधः

{सिद्धान्त-सूत्र}

[अनुपलब्धिसमप्रकरणम्(२९-३१)]

५.१.२९: तदनुपलब्धेरनुपलम्भादभावसिद्धौ तद्विपरीतोपपत्तेर् अनुपलब्धिसमः

{सिद्धान्त-सूत्र}

५.१.३०: अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः

{सिद्धान्त-सूत्र}

५.१.३१: ज्ञानविकल्पानां च भावाभावसंवेदनादध्यात्मम्

{सिद्धान्त-सूत्र}

[अनित्यसमप्रकरणम्(३२-३४)

५.१.३२: साधर्म्यात्तुल्यधर्मोपपत्तेः सर्वानित्यत्वप्रसङ्गादनित्यसमः

{सिद्धान्त-सूत्र}

५.१.३३: साधर्म्यादसिद्धेः प्रतिषेधासिद्धिः प्रतिषेध्यसाधर्म्याच्च

{सिद्धान्त-सूत्र}

५.१.३४: दृष्टान्ते च साध्यसाधनभावेन प्रज्ञातस्य धर्मस्य तस्य्स चोभयथा भावान्नाविशेषः

{सिद्धान्त-सूत्र}

[नित्यसमप्रकरणम्(३५-३६)]

५.१.३५: नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेर्नित्यसमः

{सिद्धान्त-सूत्र}

५.१.३६: प्रतिषेध्ये नित्यमनित्यभावादनित्येऽनित्यत्वोपपत्तेः प्रतिषेधाभावः

{सिद्धान्त-सूत्र}

[कार्यसमप्रकरणम्(३७-३८)]

५.१.३७: प्रयत्नकार्यानेकत्वात् कार्यसमः

{सिद्धान्त-सूत्र}

५.१.३८: कार्यान्यत्वे प्रयत्नाहेतुत्वमनुपलब्धिकारणोपपत्तेः

{सिद्धान्त-सूत्र}

[षट्पक्षीप्रकरणम्(३९-४०)]

५.१.३९: प्रतिषेधेऽपि समानदोषः

{सिद्धान्त-सूत्र}

५.१.४०: सर्वत्रैवम्

{सिद्धान्त-सूत्र}

५.१.४१: प्रतिषेधविप्रतिषेधे प्रतिषेधदोषवद् दोषः

{सिद्धान्त-सूत्र}

५.१.४२: प्रतिषेधं सदोषमभ्युपेत्य प्रतिषेधविप्रतिषेधे समानो दोषप्रसङ्गो मतानुज्ञा

{सिद्धान्त-सूत्र}

५.१.४३: स्वपक्षलक्षनापेक्षोपपत्त्युपसंहारे हेतुनिर्देशे परपक्षदोषा भ्युपगमात् समानो दोष इति

{सिद्धान्त-सूत्र}

(इति न्यायसूत्रे पञ्चमाध्यायस्य प्रथमम् आह्निकम्)

(द्वितीयम् आह्निकम्)

५.२.१: प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासन्न्यासो हेत्वन्तरम् अर्थान्तरं निरर्थकम् अविज्ञातार्थम् अपार्थकम् अप्राप्त कालं न्यूनम् अधिकं पुनरुक्तम् अननुभाषणम् अज्ञानम् अप्रतिभा विक्षेपो

मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वा भासाश्च निग्रहस्थानानि

{निग्रहस्थान-उद्देश-सूत्रम्}

[निग्रहस्थानपञ्चकप्रकरणम्(२-६)]

५.२.२: प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः

{प्रतिज्ञाहानिः लक्षण-सूत्रम्}

५.२.३: प्रतिज्ञातार्थप्रतिषेधधर्मविकल्पात् तदर्थनिर्देशः प्रतिज्ञान्तर.

{प्रतिज्ञान्तर-लक्षण-सूत्रम्}

५.२.४: प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः

{प्रतिज्ञाविरोधः लक्षण-सूत्रम्}

५.२.५: पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासन्न्यासः

{प्रतिज्ञासन्न्यासः लक्षण-सूत्रम्}

५.२.६: अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम्

{हेत्वन्तरम् लक्षण-सूत्रम्}

[निग्रहस्थानचतुष्कप्रकरणम्(७-१०)]

५.२.७: प्रकृतादर्थादप्रतिसम्बद्धार्थमर्थान्तरम्

{अर्थान्तरम् लक्षण-सूत्रम्}

५.२.८: वर्णक्रमनिर्देशवन्निरर्थकम्

{निरर्थकम् लक्षण-सूत्रम्}

५.२.९: परिषत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातमविज्ञातार्थम्

{अविज्ञातार्थम् लक्षण-सूत्रम्}

५.२.१०: पौर्वापर्यायोगादप्रतिसम्बद्धार्थमपार्थकम्

{अपार्थकम् लक्षण-सूत्रम्}

[निग्रहस्थानत्रिकप्रकरणम्(११-१३)]

५.२.११: अवयवविपर्यासवचनमप्राप्तकालम्

{अप्राप्तकालम् लक्षण-सूत्रम्}

५.२.१२: हीनमन्यतमेनाप्यवयवेन न्यूनम्

{न्यूनम् लक्षण-सूत्रम्}

५.२.१३: हेतूदाहरणाधिकम् अधिकम्

{अधिकम् लक्षण-सूत्रम्}

[पुनरुक्तिनिग्रहस्थानप्रकरणम्(१४-१६)]

५.२.१४: शब्दार्थयोः पुनर्वचनं पुनरुक्तम् अन्यत्र अनुवादात्

{पुनरुक्तम् लक्षण-सूत्रम्}

५.२.१५: अनुवादे तु अपुनरुक्तं शब्दाभ्यासात् अर्थविशेषोपपत्तेः

{पुनरुक्तम् लक्षणापवादसूत्रम्}

५.२.१६: अर्थात् आपन्नस्य स्वशब्देन पुनर्वचनम्

{पुनरुक्तम् लक्षणापवादसूत्रम्}

[उत्तरविरोधिनिग्रहस्थानचतुष्कप्रकरणम्(१७-२०)]

५.२.१७: विज्ञातस्य परिषदा त्रिः अभिहितस्य अपि अप्रत्युच्चारणम् अननुभाषणम्

{अननुभाषणम् लक्षण-सूत्रम्}

५.२.१८: अविज्ञातम् च अज्ञानम्

{अज्ञानम् लक्षण-सूत्रम्}

५.२.१९: उत्तरस्य अप्रतिपत्तिः अप्रतिभा

{अप्रतिभा लक्षण-सूत्रम्}

५.२.२०: कार्यव्यासङ्गात् कथाविच्छेदः विक्षेपः

{विक्षेपः लक्षण-सूत्रम्}

[मतानुज्ञादिनिग्रहस्थानत्रिकप्रकरणम्(२१-२३)]

५.२.२१: स्वपक्षे दोषाभ्युपगमात् परपक्षे दोषप्रसङ्गः मतानुज्ञा

{मतानुज्ञा लक्षण-सूत्रम्}

५.२.२२: निग्रहस्थानप्राप्तस्य अनिग्रहः पर्यनुयोज्योपेक्षणम्

{पर्यनुयोज्योपेक्षणम् लक्षण-सूत्रम्}

५.२.२३: अनिग्रहस्थाने निग्रहस्थानाभियोगः निरनुयोज्यानुयोगः

{निरनुयोज्यानुयोग लक्षण-सूत्रम्}

[कथकान्योक्तिनिरूप्यनिग्रहस्थानद्वयप्रकरणम्(२४-२५)]

५.२.२४: सिद्धान्तम् अभ्युपेत्य अनियमात् कथाप्रसङ्गः अपसिद्धान्तः

{अपसिद्धान्त लक्षण-सूत्रम्}

५.२.२५: हेत्वाभासाः च यथोक्ताः

{हेत्वाभास निरूपणम्}

(इति न्यायसूत्रे पञ्चमाध्यायस्य द्वितीयम् आह्निकम्)

(समाप्तश्चायम् पञ्चमाध्यायः)

न्यायदर्शनं समाप्तम्